# Surya Kavacham Srotram

**II अथ श्रीसूर्यकवचस्तोत्रम् II**

श्री गणेशाय नमः I

याज्ञवल्क्य उवाच I

श्रृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् I
शरीरारोग्यदं दिव्यं सर्व सौभाग्यदायकम् II १ II
दैदिप्यमानं मुकुटं स्फुरन्मकरकुण्डलम् I
ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् II २ II

शिरो मे भास्करः पातु ललाटे मेऽमितद्‌दुतिः I
नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः II ३ II
घ्राणं धर्म धृणिः पातु वदनं वेदवाहनः I
जिह्वां मे मानदः पातु कंठं मे सुरवंदितः II ४ II
स्कंधौ प्रभाकरं पातु वक्षः पातु जनप्रियः I
पातु पादौ द्‌वादशात्मा सर्वागं सकलेश्वरः II ५ II

सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके I
दधाति यः करे तस्य वशगाः सर्वसिद्‌धयः II ६ II
सुस्नातो यो जपेत्सम्यक् योऽधीते स्वस्थ मानसः I
स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विंदति II ७ II

**II इति श्री माद्‌याज्ञवल्क्यमुनिविरचितं सूर्यकवचस्तोत्रं संपूर्णं II**